# .. shrIdurgAsaptashlokI ..

# ॥ શ્રીદુર્ગાસપ્તશ્લોકી ॥

## Document Information

Text title : durgAsaptashlokI
File name : durga7.itx
Location : doc_devii
Language : Sanskrit
Subject : philosophy/hinduism/religion
Transliterated by : Kapila Shankaran Love kapilalove at gmail.com
Proofread by : Kapila, Shriramana Sharma jamadagni at gmail.com, NA
Latest update : November 22, 2013
Send corrections to : Sanskrit@cheerful.com
Site access : http://sanskritdocuments.org

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted for promotion of any website or individuals or for commercial purpose without permission.

Please help to maintain respect for volunteer spirit.

August 2, 2016

*sanskritdocuments.org*

# ॥ શ્રીદુર્ગાસપ્તશ્લોકી ॥

। અથ સપ્તશ્લોકી દુર્ગા ।
શિવ ઉવાચ
દેવિ ત્વં ભક્તસુલભે સર્વકાર્યવિધાયિની ।
કલૌ હિ કાર્યસિદ્ધ્યર્થમુપાયં બ્રૂહિ યત્નતઃ ॥

દેવ્યુવાચ
શૃણુ દેવ પ્રવક્ષ્યામિ કલૌ સર્વેષ્ટસાધનમ્ ।
મયા તવૈવ સ્નેહેનાપ્યમ્બાસ્તુતિઃ પ્રકાશ્યતે ॥

ૐ અસ્ય શ્રીદુર્ગાસપ્તશ્લોકીસ્તોત્રમહામન્ત્રસ્ય નારાયણ ઋષિઃ ।
અનુષ્ટુભાદીનિ છન્દાંસિ । શ્રીમહાકાલીમહાલક્ષ્મીમહાસરસ્વત્યો દેવતાઃ ।
શ્રીદૂર્ગાપ્રીત્યર્થં સપ્તશ્લોકી દુર્ગાપાઠે વિનિયોગઃ ॥

જ્ઞાનિનામપિ ચેતાંસિ દેવી ભગવતી હિ સા ।
બલાદાકૃષ્ય મોહાય મહામાયા પ્રયચ્છતિ ॥ ૧॥

દુર્ગે સ્મૃતા હરસિ ભીતિમશેષજન્તોઃ
    સ્વસ્થૈઃ સ્મૃતા મતિમતીવ શુભાં દદાસિ ।
દારિદ્ર્યદુઃખભયહારિણિ કા ત્વદન્યા
    સર્વોપકારકરણાય સદાઽઽર્દ્રચિત્તા ॥ ૨॥

સર્વમઙ્ગલમાઙ્ગલ્યે શિવે સર્વાર્થસાધિકે ।
શરણ્યે ત્ર્યમ્બકે ગૌરિ નારાયણિ નમોઽસ્તુ તે ॥ ૩॥

શરણાગતદીનાર્તપરિત્રાણપરાયણે ।
સર્વસ્યાર્તિહરે દેવિ નારાયણિ નમોઽસ્તુ તે ॥ ૪॥

સર્વસ્વરૂપે સર્વેશે સર્વશક્તિસમન્વિતે ।
ભયેભ્યસ્ત્રાહિ નો દેવિ દુર્ગે દેવિ નમોઽસ્તુ તે ॥ ૫॥

રોગાનશેષાનપહંસિ તુષ્ટા રુષ્ટા તુ કામાન્ સકલાનભીષ્ટાન્ ।
ત્વામાશ્રિતાનાં ન વિપન્નરાણાં ત્વામાશ્રિતા હ્યાશ્રયતાં પ્રયાન્તિ ॥ ૬॥

સર્વાબાધાપ્રશમનં ત્રૈલોક્યસ્યાખિલેશ્વરિ ।
એવમેવ ત્વયા કાર્યમસ્મદ્વૈરિ વિનાશનમ્ ॥ ૭॥

॥ ઇતિ દુર્ગાસપ્તશ્લોકી સમ્પૂર્ણા ॥

Encoded and proofread by Kapila Shankaran Love kapilalove at gmail.com
Proofread by Shriramana Sharma jamadagni at gmail.com, NA

.. shrIdurgAsaptashlokI ..
was typeset on August 2, 2016

Please send corrections to *sanskrit@cheerful.com*